National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(56): 185-189
© 2024 NJHSR
www.sanskritarticle.com

**डॉ. नरेशकुमारबैरवा**
सहायकाचार्यः, व्याकरणविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली- 110016

**Correspondence:**
**डॉ. नरेशकुमारबैरवा**
सहायकाचार्यः, व्याकरणविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली- 110016

# वैयाकरणभूषणसारमते विभक्त्यर्थविचारः

**डॉ. नरेशकुमारबैरवा**

**उसंहारः –**
शोधपत्रेऽस्मिन् वैयाकरणभूषणसारमते विभक्त्यर्थविचार इति विषयमवलम्ब्य विचारो कृतः। अत्र आचार्यकौण्डभट्टेन आश्रयः, अवधिः, उद्देश्यश्चेति विषये विचारः प्रकटितः। अत्र भाष्यकारस्य नैयायिकानां मीमांसकानां शाब्दिकानाञ्च मतानामुपस्थापनं क्रियतेऽत्र। इति शम्।।
**मुख्यशब्दाः -** विभक्त्यर्थः, कर्ता, कारकम्, साधनम्, व्यापारः, फलम्, धात्वर्थः, शाब्दबोधः।

**प्रस्तावना -**

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**[1]

हरेर्कारिकानुसारं यथाविदितमेव जगत्यस्मिन् यत्सर्वं व्यवहारे भवति तत्सर्वं शब्दव्यापारेणैव। वाग्व्यवहारे शब्दानां महद्योगदानं वर्तते। ते शब्दाः विभक्तिं प्रयुज्य वाक्यानां प्रयोगः कुर्वन्ति। अत्र शब्देषु का विभक्तिः, कस्मिन्नर्थे प्रयुज्यते तत्सर्वं विभक्त्यर्थविचारः क्रियते। अत अस्मिन्नैव विषये कौण्डभट्टेन भूषणसारग्रन्थे प्रोक्तम्-

**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।**
**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।**

अत्र तिङः पदत्वप्रयोजकतया क्रियया कारकस्याकाङ्क्षितत्वेन च विभक्त्यर्थविचारः सुबर्थनिर्णयप्रकरणरूपे निरूपितः। अत्र कारिकानुसारम् आश्रयरूपाविभक्तिः – कर्मद्वितीयाः, कर्तृकरणतृतीयाः, अधिकरणसप्तम्याश्च आश्रयोऽर्थः। अवधिः- कारकषष्ठ्याश्च आश्रयादिर्नार्थ इत्यपास्तम्। शक्तिरेवेति – तत्र आश्रयत्वम्, अवधित्वम्, उद्देश्यत्वम्, सम्बन्धत्वम्। तत्तद्विभक्तीनां यद्यदात्मीयमर्थस्वरूपं तद्यथायथं विभक्त्यर्थः। "यथास्वे यथायथम्" इत्युक्तेः।

**सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम्।**
**प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा।।**[2]

अयम्भावः वर्तते यत्- "कर्मणि द्वितीया" इत्यादेः प्रकरणस्य, बहुषु बहुवचनम् इत्यादेश्च सुबादिविधायकसूत्रेण सङ्ख्याकर्मादयश्च सुपामर्थाः भवन्ति, तथैव तिङामपि सङ्ख्याकर्मादिश्चार्थः, तत्र अर्थनियमः प्रसिद्ध इत्यर्थः। एषो नियमः प्रकृतेषु वेति- अत्र प्रकृतेषु अर्थेषु वा नियमः, तुल्यजातीयार्थस्य तुल्यजातीयेन नियमेव व्यावृत्तिः क्रियते। एतेषामव्ययानां सङ्ख्याद्यर्थकत्वाभावात् नियमसजातीयत्वाभावेन तेभ्यः स्वादयः सिद्ध्यन्तीति स्पष्टं "बहुषु बहुवचनम्" इति सूत्रभाष्ये सङ्गच्छते।

तत्र अनुक्तकर्त्रादिषु तृतीयादयो विभक्तयः, अनभिहिताधिकारे एतासां विधानादेव। अत्र हरिणा कथितम्-

**सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।**
**प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते।।**[3]

इति कारिकानुसारं विधेयक्रियायामेव सम्बोधनप्रथमान्तार्थ-स्यान्वयलाभात् प्रवृत्तिनिवृत्योश्च तत्फलकत्वात् प्रवर्तनादिविषय-क्रियायामेव तस्यान्वयो भवति।

अत एव व्रजानि देवदत्तेत्यादौ जानीहीति क्रियादानमावश्यकम्। अस्मत्पदार्थकर्तृकव्रजनस्य देवदत्तोद्देश्यकप्रवर्तनाविषयत्वाभावात्। विधेयक्रियायोग्यान्वयोऽपि लोडर्थप्रवर्तनाद्वारैव प्रकृत्यर्थस्य च उद्देश्यतानिरूपकत्वं तत्सम्बन्धेन प्रवर्तनायामन्वयो भवति।

अत्र नैयायिकाः वदन्ति यत् समीहितं बोधनं सम्बोधनमिति व्यत्पत्त्या विषयत्वस्याऽऽकाङ्क्षालभ्यत्वात् समीहाबोधनं च खण्डशो विभक्त्यर्थः स्वीक्रियते। अत्र समीहा इच्छा, बोधनं ज्ञानम्। तत्र "राम मां पाहि" इत्यादौ प्रयोगे विभक्त्यर्थज्ञाने प्रकृत्यर्थरामादेः सम-वायसम्बन्धेन तदर्थेच्छाया विषयतासम्बन्धेनान्वयो भवति। प्रयो-क्त्रिच्छाविषयरामसमवेतज्ञानविषयमत्कर्मकप्रवर्तनाविषयरक्षणजन-ककृतिमांस्त्वमिति नैयायिकमते बोधो जायते।

वैयाकरणां मते च त्वत्कर्तृकं मत्कर्मत्वादिविशिष्टरक्षणं प्रयोक्त्रि-च्छाविषयत्वादिविशिष्टज्ञानविषय इति बोधो भवति।

अत्र प्राचीनवैयाकरणाश्च वदन्ति यत् – प्रयोक्तृवचनार्थबोधाय अवधानादि-वैशिष्ट्योपलक्षितावस्थितिरूस्य अभिमुखीभावस्यापि सम्बोधनप्रयोगे प्रतीतेः तत्बोधनाय सम्मुखीकरणं सम्बोधनमिति व्युत्पत्त्या प्रकृतवाक्यार्थविषयकबोधफलकश्रोत्रभिमुखीभावरूप-व्यापारानुकूलव्यापारं विभक्त्यर्थं स्वीकुर्वन्ति।

नव्यास्तु केवलं **"सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।" "प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते"**[4] इति हरेः कारिकया-नुसारं लाघवाच्च प्राचीनोक्तव्यापारोद्देश्यकइच्छारूपाभिमुखीकरण-भूतो मुखपरावृत्त्याद्यभिव्यङ्ग्योऽभिमुखीभाव एवात्र सम्बोधन-मुच्यते। तद्बोधनाय समुखीभावः सम्बोधनमिति तदनुसारं ते स्वीकुर्वन्ति।

अत्र भूषणकारमते तु आश्रयोऽवधिरिति, सुपां कर्मेति भाष्यतः आश्रयः, अवधि उद्देश्यः, सम्बन्धः शक्तिरेव वा यथायथं विभक्यर्थाः ज्ञेयाः। तत्र द्वितीयातृतीयासप्तमीनाम् आश्रयोऽर्थः। पञ्चम्याश्च अवधिरर्थः। सम्प्रदानस्य चतुर्थ्या उद्देश्योऽर्थः। षष्ठ्यर्थः सम्बन्धः शक्तिरेवार्थः बोध्यः।

न च क्रियानिमित्तत्वं कारकत्वमिति वक्तव्यम्, चैत्रस्य तण्डुलं पचतीति प्रयोगे सम्बन्धिनी चैत्रादावतिव्याप्तेः अनुमित्यादि-प्रकाशनद्वारा सम्प्रदानादेरिव तण्डुलादिद्वारा सम्बन्धिनोऽपि क्रियानिमितत्त्वात्। तत्र क्रियानिष्ठावच्छेदकतानिरूपित-सुप्तिङन्य-तरार्थनिष्ठावच्छेदकता निरूपितावच्छेदकतावत्वं तत्वमिति तात्पर्यः। स च विभक्त्यर्थश्च विशेष्यतयैव चैत्रघटादौ षष्ठ्यर्थस्य तण्डुलादिनामार्थान्विततया क्रिया अनन्वितत्वात्। अर्थात् षष्ठ्यर्थे कारकाणां साक्षादन्वयो न स्यात्। अत एव षष्ठ्यर्थस्य उपपद-विभक्त्यर्थस्य च न कारकत्वं स्वीकुर्वन्ति वैयाकरणाः। उपपदविभक्तीनामपि सम्बन्ध एवार्थः स्वीक्रियते।

न च कारकान्तराप्रयोज्यत्वे सति कारकचक्रप्रयोजकत्वं कर्तृत्वमिति वाच्यम्, "स्थाल्यां पचति" इति प्रयोगे तु प्रवर्त्तनायाश्चेतनधर्मत्वेन अचेतने स्थाल्यादौ तदबाधात् कर्तृत्वाभावात्, अस्मात्कारणात् प्रकृतधात्वर्थप्रधानीभूतव्यापाराश्रयत्वमेव कर्तृत्वं स्वीक्रियत इति।

**द्वितीयाविभक्त्यर्थः -**

कर्मत्वं च "प्रकृतधात्वर्थप्रधानीभूतव्यापाराप्रयोज्यप्रकृतधात्वर्थ-फलाश्रयत्वेन उद्देश्यत्वम्"। अर्थात् प्रकृतप्रधानीभूतो यो व्यापारः तत्प्रयोज्यं यत् प्रकृतधात्वर्थफलं तत्फलाश्रयत्वेन उद्देश्यत्वमित्यर्थः। तद्यथा- देवदत्तो हरिं भजति इत्यदौ प्रयोगे प्रकृतधातुः भज् धातुः तदर्थप्रधानीभूतो व्यापारो भजनानुकूलव्यापारः तत्प्रयोज्यत्वं प्रकृतधात्वर्थफलं प्रीतिरूपफलं तदाश्रयत्वेन उद्देश्यत्वं हरेरिति भवति तस्य कर्मसञ्ज्ञा जायते। फलाश्रयत्वं च फलावच्छेदकसम्बन्धेन ग्राह्यम्। फलतावच्छेदकसम्बन्धश्च येन सम्बन्धेन फलाश्रयत्व-प्रकारिकेच्छा भवति स सम्बन्धः। तण्डुलं पचति इति प्रयोगे द्रष्टुं शक्यते। अत्र समवायसम्बन्धेन विक्लित्त्याश्रयः तण्डुलः भवतु इति इच्छा, तस्या इच्छायाः सत्त्वेन तेनैव सम्बन्धेन तण्डुलस्य फलाश्रयत्वात् कर्मत्वं साध्यते।

भगवता पाणिनिना **"कर्तुरीप्सिततमं कर्म"**[5] इति सूत्रे प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्य प्रकृतधात्वर्थफलाश्रयत्वेन उद्देश्यत्वमेव ईप्सिततमत्वं स्वीक्रियते। "गां दोग्धि पयः" प्रयोगेऽत्र पयोवृत्तिः यो विभागः तदनुकूलो व्यापारो गोवृत्तिः तदनुकूलश्च गोवृत्तिः। अत्र पयसः कर्मत्वसिद्धये प्रयोज्यत्वनिवेशः। जन्यत्वनिवेशे तु प्रधानीभूतगोवृत्तिव्यापारजन्यवत्वस्य गोव्यापारे एव सत्त्वात् विभागे तदभावेन पयसः कर्मत्वं न भवति। साक्षात् परम्परासाधारणप्रयोज्यत्वस्य निवेशे तु प्रधानव्यापारप्रयोज्यत्वस्य विभागेऽपि सत्त्वात् तदाश्रयत्वेन पयसः कर्मत्वसिद्धेः।

यतोहि क्रियाजन्यफलाश्रयत्वं कर्म सप्तविधम्। ईप्सिततम अनीप्सितमभेदात् कर्म मुख्यतो द्विविधम्। ईप्सिततमं कर्म – निवर्त्त्य-विकार्य-प्राप्यभेदेन त्रिविधम्। तदनु अनीप्सितकर्म- उदासीनम् - द्वेष्यम्- सञ्ज्ञान्तरैरनाख्यातम्- अन्यपूर्वकम् इतिभेदात् चतुर्विधम्। एवंविधं सप्तविधानि कर्माणि भवन्ति। तेषां कर्मणां निरूपणं क्रियतेऽत्र भर्तृहरिणा तदुक्तम्-

**निर्वर्त्यश्च विकार्यश्च प्राप्यश्चेति त्रिधा मतम्।**
**तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम्।।**
**औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम्।**
**सञ्ज्ञान्तरैरनाख्यातं यच्चाप्यन्यपूर्वकम्।।**[6]

एतेषां कर्मणां लक्षणं कुर्वता आचार्यभर्तृहरिणा प्रोक्तम्-

**यदसज्जायते सद्वा जन्मना यत्प्रकाशते।**
**तन्निर्वर्त्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्।।**[7]
**प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठाधिभस्मवत्।**
**क्रियाकृतविशेषेणां सिद्धिर्यत्र न गम्यते।**
**किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।**

**दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।**[8]

अत्रेदमवधेयं यत् – एतत् तत्त्वम्- सदसद् वैशेषिकाद्यनुसारेण जायते। साङ्ख्यमतानुसारेण सदेव जायते। तदुभयमपि जन्मना यद् प्रकाश्यते तन्निवर्त्यं कर्म भवति।

तात्पर्यमिदं वर्तते यद् तार्किकानां मतानसारेण उत्पत्तेः पूर्वमसद् यथा वन्ध्यापुत्रादिवद् अलोकं कारणसामग्र्या जायते। सांख्यमतेन तु उत्पत्तेः प्राग् सदेव वा जायते। तदुभयमप्युत्पत्तेः पूर्वमसदनभिव्यक्तं वा जन्मना प्रकाश्यमानत्वात् निर्वर्त्यं कर्म कथितमस्ति।

कार्यकाले विद्यमानाऽविद्यामाना वा प्रकृतिः परिणामित्वेन विवक्ष्यते। तदा कर्मणो विकार्यत्वम्। तथा च प्रतीयमानप्रकृति-विकृतिभावकत्वे सति क्रियानिर्वाह्यविशिष्टा-सत्त्वोत्पत्त्यन्तरफलत्वं विकार्यत्वम्। विकारश्च कर्म द्विविधम्- प्रकृत्युच्छेदसंभूतम् प्रकृते-रुच्छेदो निरन्वयो विनाशः तस्मात् संभूतं जातम्। किञ्चिद् विकार्यं कर्म। यथा- काष्ठादिवत्। किञ्चित् तु कर्म गुणान्तरोत्पत्त्या विकार्यं कर्म। यथा- सुवर्णादिविकारवत्। येन प्रकारेण सुवर्णपिण्डविकारभूते सति कुण्डले इति। यत्र दर्शनाद् अनुमाद्वा क्रियाकृत विशेषाणां सिद्धिर्न ज्ञायतेऽवबुध्यते तत् प्राप्यं कर्म इति कथ्यते। तथा च क्रियाप्रयोज्यअसाधारणधर्मप्रकारकप्रतीतिविषयमाश्रयत्वे सति पक्षा-श्रयत्वं प्राप्यत्वं कर्म भवति।

अत्र क्रमशः सप्तविधानां कर्मणाम् उदाहरणानि परिगण्यन्ते-

1. ईप्सिततम् (निर्वर्त्यम्) कर्म- घटं करोति।
2. ईप्सिततम् (विकार्यम्) कर्म- काष्ठं भस्म करोति।
3. ईप्सिततम् ( प्राप्यम्) कर्म- अत्र घटं पश्यति, ग्रामं गच्छति।

क्रियाजन्यफलाश्रय-अनीप्सिततमं कर्म चत्वारि भवन्ति -

1. उदासीनकर्म – ग्रामं गच्छन् तृणं स्पृशति ।
2. द्वेष्यकर्म- ओदनं भुञ्जानो विषं भुङ्क्ते।
3. सञ्ज्ञान्तरैरनाख्यातं कर्म- गां दोग्धि पयः।
4. अन्यपूर्वकं कर्म- क्रूरम् अभिक्रुद्ध्यति।

एवम्प्रकारेण विशिष्टे कर्मणि द्वितीयाविभक्तिर्भवति- "कर्मणि द्वितीया"[9] इति सूत्रेण द्वितीयाविभक्तिः विधीयते।

**तृतीयाविभक्त्यर्थः –**

अत्र भूषणकारमते तृतीयायारर्थ आश्रयो वर्तते। कारकतृतीयायाः कर्ता, करणञ्च वाच्यम् "कर्तृकरणयोश्च तृतीया"[10] इति सूत्रात् ज्ञायते। तत्र कर्तृत्वबोधकं सूत्रं वर्तते "स्वतन्त्रः कर्ता"[11] "कारके" इत्यधिकारात्, क्रियायां स्वातन्त्र्येण कर्तृसञ्ज्ञक इति सूत्रार्थः। स्वातन्त्र्यं च धात्वर्थव्यापाराऽऽश्रयत्वमिति। अर्थात् स्वातन्त्र्यञ्च व्यापारतावच्छेदकसम्बन्धेन तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकार-ताश्रयत्वे सति तन्निरूपित विशेष्यतारूपमुख्यविशेष्यतावद्-धात्वर्थाश्रयत्वम्। तद्धात्वर्थनिष्ठेत्यत्र धात्वर्थश्च तात्पर्यग्राहक-अनपेक्षधातुशक्य एव ग्राह्यः। तेन णिचः द्योतकत्वेऽपि **देवदत्तेन यज्ञदत्तः पाचयति** इति प्रयोगे तु पच् धात्वर्थप्रयोज्यव्यापारा-श्रयप्रयोजकव्यापाराश्रयस्य कर्तृत्वसिद्धिर्भवति।

अत्र कर्तृप्रत्ययसमभिव्याहारे इत्यपि विशेषणं ज्ञेयम्। तेन **पक्वः तण्डुलो देवदत्तेन** इत्यादौ प्रयोगे फलस्य विशेष्यत्वेऽपि देवदत्तस्य कर्तृत्वसिद्धिर्जायते। अत्रापि व्यापारस्य अन्यत एव लाभात् आश्रयमात्रं तृतीयार्थः कृतः। यथा भूषणकारेणोक्तम्- "**आश्रयऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा**"[12] इति।

अत्र "कर्तृकरणयोश्च तृतीया"[13] इति सूत्रेण करणकारके तृतीया विभक्तिर्भवति। तत्र "साधकतमं करणम्"[14] इति सूत्रेण साधकतमं करणत्वमित्यर्थः संगच्छते। तत्र स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं साधकतमत्वम्। तदेव करणं भवति। अत्र तमबर्थः प्रकर्षः स चाव्यवधानेन फलजनकत्वव्यापारवत्ता। तादृशव्यापार-वत्कारणं करणम्। वाक्यपदीये हरिणा प्रतिपादितम्-

**क्रियायाः परिनिष्पत्तिर्यद् व्यापारादनन्तरम्।**
**विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्।।**
**वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम्।**
**स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते।।**[15]

अत्र कर्तृत्वं विवक्षानिबन्धनम्। तेन स्थाल्यादिव्यापारस्यापि धात्वर्थविवक्षायां स्थाली पचतीति भवति। एवमेकस्यैव उपाधिभेदेन कर्तृत्वकर्मत्वकरणत्वान्यपि भवन्ति। यथात्मानमात्मना सृजतीति। अत्र भर्तृहरिणा प्रोक्तम्-

**एकस्य बुद्ध्यवस्थाभिः भेदे च परिकल्पिते।**
**कर्मत्वं करणत्वञ्च कर्तृत्वञ्चोपजायते।।**[16]

**चतुर्थीविभक्त्यर्थः –**

अत्र कारकचतुर्थ्याः सम्प्रदानमर्थोऽस्ति। " चतुर्थी सम्प्रदाने "[17] इति सूत्रात्। सम्प्रदानबोधकं शास्त्रं वर्तते " कर्मणा यमभिप्रैति स सम्प्रदानम् "[18] इति सूत्रम्। धात्वर्थकर्मणा सम्बन्धुम् इच्छति सम्प्रदानम् अथवा सम्यक् प्रदीयते यस्मै तत्सम्प्रदानमिति तदर्थः। अत्र कर्मणा-करणभूतेन,यमभिप्रैति-ईप्सति, तत्कारकं सम्प्रदानमित्यर्थका-दुद्देश्यमिति कौण्डभट्टेन स्वीकृतम्।

कर्मनिष्ठेत्यनेन कर्मणः चतुर्थीनिमित्तत्वप्रदर्शनादत् कर्मश्रुत्यपेक्षया चतुर्थी श्रुतेर्बलवत्त्वं बोध्यते। इदमेव शेषित्वम्। तदुद्देश्यकेच्छा-विषयित्वं च शेषित्वमित्येव पूर्वतन्त्रे निरूपितम्। अत एव "**प्रासन् मैत्रावरुणाय दण्डप्रदानम्**"[19] इत्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति दण्डदानं न प्रतिपत्तिः।

अत्र केचित्तु कर्तुरिच्छा विषयश्चतुर्थ्यर्थः। फलस्य धातुना निरूपित्वस्य संसर्गमर्यादया लाभात्। अयमेव चोद्देश्य इत्युच्यते। एवञ्च "विप्राय गां ददाति " इति प्रयोगे तु स्वत्वतन्निवृत्ति-उभयानुकूलव्यापाररूप-दाधात्वर्थैकदेशे स्वत्वे चतुर्थ्यर्थस्य निरूपक-तयान्वयः। एवं च विप्राभिन्नेच्छाविषयनिरूपितस्वत्वस्वीयतन्नि-वृत्तिउभयानुकूलो व्यापार इति बोधो जायते।

तथापि "रजकाय वस्त्रं ददाति " इत्यपि खण्डिकोपाध्यायः शिष्याय चपेटां ददाति इति भाष्योदारणात् इष्टमेव। वृत्तिकारस्तु सम्यक् प्रदीयते यस्मै तत्सम्प्रदानम् इत्यन्वर्थसञ्ज्ञया स्वस्वत्व-

निवृत्तिपर्यन्तमर्थं वर्णयन्तः "रजकस्य वस्त्रं ददाति" इत्याहुः। तदुक्तं वाक्यपदीयकारेण-

**अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम्।**
**प्रेरणानुमतिभ्यां त लभते सम्प्रदानम्।।**[20]

तच्च सम्प्रदानं त्रिविधम्- अनिरीकर्तृप्रेरयितृ -अनुमन्तृ भेदात्। यथा सूर्यायार्घ्यं ददाति इत्याद्यम्। नात्र सूर्यः प्रार्थ्यते, नानुमन्यते न निराकरोति। प्रेरकम् – विप्राय गां ददाति। अनुमन्तृ उपाध्यायाय गां ददातीति भूषणसारे प्रतिपादितम्।

**पञ्चमीविभक्त्यर्थः –**

अत्र पञ्चम्यर्थ अवधिः। अर्थात् अपादानम् अवधिरर्थः। "**आश्रयोऽवधिरुद्देश्यः**" इत्युक्तेः अपादानार्थे पञ्चमी विभक्तिर्भवति। "**अपादाने पञ्चमी**"[21] इति शास्त्रं प्रमाणम्। तच्च लक्षणबोधकञ्च शास्त्रं वर्तते यत् "**ध्रुवमपायेऽपादानम्**"[22] इति सूत्रेऽत्र अपायो विश्लेषः सम्बन्धाभावः। स च वास्तवसम्बन्धो नास्ति। किञ्च बुद्धिपरिकल्पितोऽपि मथुरा पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ प्रयोगे तु बुद्धिपरिकल्पितापायाश्रयणेन एव भाष्ये पञ्चमी व्याख्यात। तत्र बुद्धिपरिकल्पितमपादानत्वमपि ग्राह्यं भवति। अस्मिन्नंशे "जुगुप्साविराम-प्रमादार्थामुपसंख्यानम्" इति वार्तिकं भाष्ये प्रत्याख्यातमिति मानमिति बोध्यम्।

अवधित्वञ्च पूर्वोक्तविश्लेषाश्रयत्वसमानाधिकरणः स्वरूपसम्बन्ध-विशेषः पदार्थान्तरं वा। तत्र विश्लेषस्य धातुलभ्यत्वादवधित्वेनावधिः पञ्चम्यर्थः स्वीकृतः। एवमेव अपायः विश्लेषः तज्जनकक्रिया, तत्रावधिभूतम् अपादनमित्यर्थकादवधिभूतमिति भावः। यथा वाक्यपदीयकारेण हरिणा प्रोक्तम्-

**अपाये यदुदासीनं चलं वा यदि वाऽचलम्।**
**ध्रुवमेवातदावेशात्तदपादानमुच्यते।।**
**पततो द्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।**
**तस्मादश्वस्य पतने कुड्यादि ध्रुवमुच्यते।।**[23]

अपि चोक्तम् –

**उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे।**
**विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते।।**
**मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।**
**मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्।।**[24]

हरिणा कारिकामाध्यमेन स्पष्टं कृतम्। तथा च अपादानं त्रिविधम्-निर्दिष्टविषयम्-उपात्तविषयम् -अपेक्षितकियञ्चेति भेदात् त्रिविधम्। अत्रापि भर्तृहरिणा वाक्यपदीये लिखितम्-

**निर्दिष्टविषयं किञ्चिद् उपात्तविषयं तथा।**
**अपेक्षितक्रियं चेति त्रिधापादानमुच्यते।।**

इह निर्दिष्टविषयस्योदाहरणम् – अश्वात् पतति यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम्। यथा- बलाहकाद् विद्योतते। निः सरणाङ्गे विद्योतने द्युतिर्भवति। अपेक्षा क्रिया यत्र तदन्त्यम्। यथा - कुतो भवान्? पाटलिपुत्रात्। अत्र आगमनमर्थ-मध्याहृत्यान्वयो विधेयः।

**सप्तमीविभक्त्यर्थः -** अधिकरणमर्थः " **आधारोऽधिकरणम्**"[25] इति सूत्रेण अधिकरणसञ्ज्ञा विधीयते। अधिकरणे कारके "सप्तम्यधिकरणे च"[26] इति सूत्रेण सप्तमीविभक्तिर्भवति। आधारत्वञ्च आश्रयत्वम्। तत्र आश्रयांशः शक्यः तत्त्वमवच्छेदकम्। नच आश्रयत्वमात्रेण कर्मकर्तृ-करणानामाधारसंज्ञा स्यात्, स्यादेव, यदि ताभिरस्यां बाधो न स्यात् "कारके"[27] इति सूत्राधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येव बोध्यते। तथाप्यत्र कर्तृकर्मद्वारा तदाश्रयत्वमप्यस्त्येव। न चैवं साङ्कर्यमेव स्यादिति वाच्यम्, निरूपकभेदात्। फलनिरूपितश्च सप्तम्यर्थो भवति। यथा- स्थाल्यां पचति, भूतले वसति, कटे शेते इत्यादयः प्रयोगाः सङ्गच्छते। वाक्यपदीये हरिणा प्रतिपादितम्-

**कर्तृकर्मव्यवहितामसाक्षाद्धारयत क्रियाम्।**
**उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।**[28]

तत्र आधारस्त्रिधाऔपश्लेषिकः, वैषयिकः, अभिव्यापकश्चेति। तत्र संयोगसमवायादिसम्न्धेन कर्तृकर्मसम्बद्ध आद्यः। विषयतासम्बन्धेन तत्सम्बद्धो द्वितीयः। व्यापकत्वसम्बन्धेन सम्बद्धः तृतीयः। तत्र कटे शेते इति प्रयोगे तु स्ववृत्तिकर्तृकत्वसम्बन्धेन कटवृत्तिशयनमिति बोधो जायते। मोक्षे इच्छास्ति इति प्रयोगे स्वविषयकर्तृकत्वसम्बन्धेन मोक्षवृत्तिरिच्छाकर्तृका सत्तेति बोधोऽपि जायते।

**षष्ठीविभक्त्यर्थः –**

नव्यवैयाकरणाः नागेशभट्टादयः सम्बन्धस्य कारकत्वं स्वीकुर्वन्ति न। शास्त्रे तेषां मते षट्कारकाणि भवन्ति। किञ्च प्राचीनवैयाकरणाः सम्बन्धस्य कारकत्वं स्वीकुर्वन्ति। तेषु कौण्डभट्टमते तु इयं शेषषष्ठी मन्यते। शेषषष्ठ्याः सम्बन्धः शक्तिर्वेत्यर्थः। यथा कोण्डभट्टेन प्रतिपादितं भूषणसारे "**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा**" इत्युक्तेः "षष्ठी शेषे" इत्यनेन सूत्रेण कारकप्रातिपदिकार्थभिन्न-स्वस्वामिभावादिसम्बन्धः शेषः तस्मिन् षष्ठी क्रियते। स च सम्बन्धः सम्बन्धत्वेन तत्तद्रुपेण क्वचिच्च सम्बन्धत्वेन प्रतीयते। तद्यथा- "राज्ञः पुरुषः" इति प्रयोगे राजादिसम्बन्धे विशेषणम्, सम्बन्धश्च पुरुषे विशेषणम् अत्र राजसम्बन्धिनपुरुष इत्ययं बोधो जायते। एवञ्च स्वस्वामिभावस्य द्विष्ठत्वेऽपिविशेषणवाचकाद् राजशब्दादेव षष्ठी, न तु पुरुषादिपदात्, यतोहि प्रकृत्यर्थं प्रति प्रत्ययार्थस्य प्राधान्यानुरेधात्। अथ च विशेष्यपुरुषादौ कारकप्रातिपदिकार्था-ऽन्यतरत्वस्य आवश्यकत्वेन अशेषत्वात् तस्मान्न षष्ठी भवति।

वस्तुतस्तु शब्दशक्तिस्वभावाद् विशेषण एव सम्बन्ध उद्भूतया प्रतीयत इति विशेषवाचकपदादेव षष्ठी भवति। अत्र हरिणा वाक्यपदीयग्रन्थे प्रतिपादितं यत् –

**द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।**
**तत्राभिधीयमानः सन् प्रधानेऽप्युपभुज्यते।।**[29]

आचार्यपाणिनेः मते तु सम्बन्धस्य कारकत्वं न मन्यते। यथा "कारके" इति सूत्राधिकारक्षेत्रे कस्मिंश्चिदपि सूत्रे सम्बन्ध इत्यस्य कर्मादिवत् चर्चाया अभावात्। वृत्तिकारेणास्य व्याख्यानविषये प्रोक्तम्- "कारक इति किम् ? माणवकस्य पितरं पन्थानं पृच्छति "इति जयादित्येन प्रत्युदाहरणे प्रतिपादितम्।

महाभाष्यकारः पतञ्जलिः प्रदीपकैयटयोर्मते तु षडेव कारकाणि न तु सम्बन्धस्य कारकत्वमिति चेत् न, तत्र भाष्ये "कारके" इति सूत्रव्याख्यानेऽनेन उच्यते- **"किमिदं कारक इति ? सञ्ज्ञानिर्देशः"**[30]। तत्रैव प्रदीपकारेण प्रतिपादितम् – **अथ विशेषणत्वेनाऽधिकारस्तदा कारकाद् दत्तश्रुतयोरित्यादावपादानादिसञ्ज्ञादिकस्यापि कारकस्य ग्रहणं प्राप्नोति। षड्विधस्यैव चेष्यते। तद्व्यतिरिक्तश्च कारकमस्ति, यथा नटस्य श्रृणोतीति प्रश्नः।**[31]

इत्युक्ते आभ्यां सम्बन्धस्यापि कारकत्वं स्वीकारादेव। "षष्ठी शेषे " इति सूत्रभाष्ये कथितं यत् " शेष इत्युच्यते कः शेषो नाम? कर्मादिभ्यो येऽन्यर्थाः सः शेषः। तत्र शेषग्रहणं कर्तव्यं षष्ठीनियमार्थं शेष एव षष्ठी भवति, नान्यत्रेति" इत्यक्त्यानुसारेण कर्मादिभिन्ने शेषेऽर्थे षष्ठी भवत्येव नान्यत्रेति स्वीकृततः। तत्र सम्बन्धस्य कारकत्वाविरोधदर्शनाच्च महाभाष्यकारमतेऽपि प्रकारान्तरेण सम्बन्धस्य कारकत्वं प्रतीयते। अत एवोक्तं कैयटेन प्रदीपे - **"तत्राश्रुतायां क्रियायां राज्ञः पुरुष इत्यादौ प्रयोगे क्रियाकारक-सम्बन्धपूर्वकोऽन्य एव स्वस्वामादिभावादिकः सम्बन्धः प्रतीयते। मातुः स्मरतीत्यादौ तु श्रूयमाणे क्रियाशब्दे सदपि कर्मत्वम् अविवक्षित्वाविशेषणभाव एव स्मरणं प्रति मातुः प्रतिपाद्यते मातृसम्बन्धिस्मरणमिति।"**[32]

अत्रेदमवधार्यम्, उपर्युक्तकैयटोक्तेः शेषषष्ठ्याः विषये कारक-बोधकत्वं प्रतीयते। तथापि पाणिनीयपरिभाषितकारकसञ्ज्ञकत्वरूपं कारकं न स्वीकृतम्। अपितु क्रियाजनकत्वं रूपम्। अत एव "षड्विधस्यैव चेष्यते" इति प्रदीपोक्तिः चरितार्थो भवति। अतः कारकमिदं शेषषष्ठीत्वेन स्वीकर्तव्यमित्ये वैयाकरणानां सिद्धान्तोऽस्ति।

**उपसंहारः –**

शोधपत्रेऽस्मिन् **वैयाकरणभूषणसारमते विभक्त्यर्थविचार** इति विषयमवलम्ब्य विचारो कृतः। अत्र आचार्यकौण्डभट्टेन आश्रयः, अवधिः, उद्देश्यश्चेति विषये विचारः प्रकटितः। अत्र भाष्यकारस्य नैयायिकानां मीमांसकानां शाब्दिकानाञ्च मतानामुपस्थापनं क्रियतेऽत्र। इति शम्।।

**सन्दर्भग्रन्थसूची –**


1. पाण्डेयः, गोपालदत्तः, वैयाकरणसिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, सं. 2017 वर्षम्।
2. शर्मा, पं. रघुनाथः, वाक्यपदीयम्- अम्बाकर्त्रीटीकासहितम् (तृतीयकाण्डम्), प्रकाशनम्- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
3. शास्त्री, श्री गुरुप्रसादः, सम्पादकः , व्याकरणमहाभाष्यम् , प्रकाशनम्- राष्ट्रियसंस्कृतसंस्थानम्, वर्षम्-2006.
4. भट्टः,श्रीमत्कौण्डः, विरचितम् – वैयाकरणभूषणसाररः टीकाद्वयं संवलिता प्रभा, दर्पणं च व्याख्याद्वयोपेतः, श्रीबालकृष्णपपञ्चोली, श्री हरिवल्लभशास्त्री, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, वि.सं. 2068.
5. पाणिनिः – अष्टाध्यायी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, सं. 2017 वर्षम्।
6. शर्मा, वासुदेवः, संशोधकः – वैयाकरणसिद्धान्तकौमुदी, तत्त्व-बोधिनी, प्रकाशनम् – श्री ला.ब.शा.रा.संस्कृतविद्यापीठम्, नवदेहली, वर्षम्- 2009.


**सन्दर्भग्रन्थाः –**

1 वा.प.ब्र.का. कारिका-01, शर्मारघुनाथः, अम्बाकर्त्रीटीका, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, वाराणसी

2 वैयाकरणभूषणसारः, भट्टः, कौण्डः- सुबर्थनिर्णयः।

3 वाक्यपदीयम्, साधनसमुद्देशः, का. 163

4 वाक्यपदीयम्, साधनसमुद्देशः, का. 163

5 पा.सू. 1.4.49

6 वा.प.तृ.काण्डम्, साधनसमुद्देशः, का. 45-46.

7 वा.प.तृ.काण्डम्, साधनसमुद्देशः, का. 49

8 वा.प.तृ.काण्डम्, साधनसमुद्देशः, का. 50-51

9 पा.सू. 2.3.2

10 पा.सू. 2.3.18

11 पा.सू. 1.4.54

12 वै.भू.सा. का.24

13 पा.सू. 2.3.18

14 पा.सू. 1.4.42

15 वा.प.तृ.काण्डम्, साधनसमुद्देशः, का. 90-91

16 वा.प.तृ.काण्डम्, साधनसमुद्देशः, का. 104

17 पा.सू. 1.4.32

18 पा.सू. 4.2.6

19 पू.मी. 4.2.6

20 वा.प.तृ.काण्डम्, साधनसमुद्देशः, का. 2

21 पा.सू. 2.3.28

22 पा. सू. 1.4.241

23 वा.प.तृ.काण्डम्, साधनसमुद्देशः, का. 114

24 वा.प.तृ.काण्डम्, साधनसमुद्देशः, का. 140

25 पा.सू. 1.4.45

26 पा.सू. 2.3.36

27 पा.सू. 1.4.23

28 वा.प.तृ.का. साधनसमुद्देशः , का.148

29 वा.प.तृ.का., साधनसमुद्देशः, का. 157

30 व्या.म.भाष्यम्, 1.4.3 आह्निकम्-2

31 व्या.म.भाष्यस्य प्रदीपटीकायां प्रतिपादितम् ।

32 व्या.म.भा. प्रदीपटीकायां प्रतिपादितम्- 2.3 आह्निके, पा.सू. 50